श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते दशमस्कन्धे

# ॥ श्री भ्रमरगीतम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री भ्रमरगीतम् ॥

गोप्युवाच

मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्याः
    कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
    यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ 1 ॥

सकृदधरसुधां स्वां मोहिनीं पाययित्वा
    सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक्।
परिचरति कथं तत्पादपद्मं नु पद्मा
    ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥ 2 ॥

किमिह बहु षडङ्घ्रे गायसि त्वं यदूनाम्
    अधिपतिमगृहाणामग्रतो नः पुराणम्।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
    क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥ 3 ॥

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
    कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः।
चरणरज उपास्ते यस्य भूतिर्वयं का
    अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ 4 ॥

विसृज शिरसि पादं वेद्म्यहं चाटुकारैः
    अनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्।

स्वकृत इह विसृष्टापत्यपत्यन्यलोका
    व्यसृजदकृतचेताः किं नु सन्धेयमस्मिन्॥ 5॥

मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा
    स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्त्वावेष्टयद् ध्वाङ्क्षवद् यः
    तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः॥ 6॥

यदनुचरितलीलाकर्णपीयूषविप्रुट् -
    सकृददनविधूतद्वन्द्वधर्मा विनष्टाः।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
    बहव इह विहङ्गा भिक्षुचर्यां चरन्ति॥ 7॥

वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
    कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्र -
    स्मररुज उपमन्त्रिन् भण्यतामन्यवार्ता॥ 8॥

प्रियसख पुनरागाः प्रेयसा प्रेषितः किं
    वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
    सततमुरसि सौम्य श्रीर्वधूः साकमास्ते॥ 9॥

अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते
    स्मरति स पितृगेहान् सौम्य बन्धूंश्च गोपान्।
क्वचिदपि स कथा नः किङ्करीणां गृणीते
    भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु॥ 10॥

॥ इति श्री भ्रमरगीतं समाप्तम्॥